International Journal of Sanskrit Research 2022; 8(5): 17-18

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(5): 17-18
© 2022 IJSR
www.anantaajournal.com
Received: 17-05-2022
Accepted: 22-06-2022

**Sabarees M**
Research Scholar, Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya Enathur, Kanchipuram, Tamilnadu, India

# संस्कृतसाहित्यस्य प्रगतिः

**Sabarees M**

## प्रस्तावना

विश्वभाषासु संस्कृतं प्राचीनतमं सिद्धं च अस्ति । अस्य ज्ञानभण्डागारः तु अप्रतिमः अमूल्यश्च संसारनिधिः अस्ति । सत्यस्य अन्वेषणे पूर्णस्वतन्त्रतां प्रदर्शयन्त्याः भारतीयपरम्परायाः विचारस्य च यथार्थं प्रतीकम् इति भासते इयं भाषा, सार्वत्रिकसत्यं प्रति लौलिकतां दर्शयतीयम्। एषा अद्वितीयभाषा न केवलम् अस्य देशस्य जनानां कृते प्रज्ञायाः उत्तमं विवरणं धारयति, अपि तु सम्पूर्णविश्वस्य जनानां कृते महत्त्वपूर्णा अस्ति।

अधिकप्रतिशतं जनानां मतं यत् संस्कृतं केवलं वैदिकपूजनमन्त्रप्रधानम् इति,तथा संस्कृतसाहित्यशब्देन 'रामायण-महाभारत-पुराण-उपनिषद्प्रधानानि' तथा संस्कृतकथाशब्देन 'पञ्चतन्त्रम्', 'हितोपदेशम्' तथा 'वेतलपञ्चविंशति' इति ग्रन्थाधिष्ठिता एवेति। । एषा चिन्ता परम्परागतरूपेण जनानां मनसि अनादिकालात् एव अस्ति । प्राचीनकाले संस्कृतं सार्वत्रिकम् आसीत् इति किन्तु अनेके विद्वांसः आधुनिकसंस्कृतसाहित्यम् अकल्पनीयं मन्यन्ते । परन्तु वास्तविकं सत्यं तन्न । रामायणं, महाभारतं, पुराणानि च प्राचीनसंस्कृतसाहित्यस्योदाहरणान्येव। तथा कालिदासस्य अभिज्ञानशाकुन्तलं, विक्रमोर्वशीयं, मेघदूतं, भासस्य अभिषेकनाटकं, प्रतिमानाटकं, ऊरुभङ्गम्, कर्णभारम्, भट्टनारायणस्य वेणीसंहारं, भासस्य त्रयोदशनाटकादीनि मध्ययुगीनसंस्कृतसाहित्योदाहरणानि । कालान्तरेण दीर्घमध्ययुगसाहित्यम् अन्यत्प्रान्तीयसाहित्यं च अतिक्रम्य आधुनिकयुगेऽपि संस्कृतसाहित्यं स्थिरं वर्तते। आधुनिककालस्य संस्कृतसाहित्यम् प्राचीन-मध्यकालीनकालमपेक्ष्य समृद्धतममासीत्।

क्रिस्तोः पूर्वं 1500 तमे वर्षादारभ्यैव प्राचीनसंस्कृतकालः इति भाषागवेषकैः कथ्यते। तस्मिन् काले सर्वैः संस्कृतस्य प्रयोगः कृतः आसीत् इति कल्पयितुं शक्यते । यतो हि भारते तत्कालीनाः ग्रन्थाः सर्वे संस्कृते एव आसीत्। कुतः इति चेत् सर्वेषां ज्ञानभाषा संस्कृतम् एव आसीत् । वैदेशिकाक्रमणात् अत्रत्याः ग्रन्थाः नाशोन्मुखं जाताः इति चरित्रं अस्मान् स्मारयति। किन्तु मध्यकाले संस्कृतस्य गतिः विपरीता जाता ।

**Corresponding Author:**
**Sabarees M**
Research Scholar, Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya Enathur, Kanchipuram, Tamilnadu, India

क्रिस्तोः पूर्वं 60 वर्षादारभ्यैव मध्यकालीनसंस्कृतसाहित्यस्य आरम्भः इति परिगणयितुं शक्यते। मध्ययुगभारतीयधार्मिकसाहित्यस्य मुख्या भाषा संस्कृतमेवासीत्। अस्मिन् काले भारतेन सम्मुखीभूतानि विदेशीय-आक्रमणानि, विदेशभाषाणां प्रभावः च संस्कृतस्य प्रयोगे, प्रचारे, पठने, शिक्षणे च अपचयं कृतमिति निर्णेतुं शक्यते । अतः अस्मिन् काले निष्पन्नाः संस्कृतकृतयः प्राचीन-आधुनिककालापेक्षया विरलमेव।अस्मिन् काले उन्नतकुलजाताः, प्रासादाश्रिताः पण्डिताः तथा अधिकारिणः एव संस्कृतपठने संस्कृतपाठने एवं ग्रन्थरचनायां च व्यापृताः इत्यपि द्रष्टुं शक्यते ।

आधुनिककाले संस्कृतं सर्गवासनायाः व्यञ्जनमाध्यमरूपेण वर्तते। पूर्वशताब्दद्वयात् आरभ्य साहित्यस्य इतिहासः 'आधुनिककालः' इति कथ्यते । तत् अद्यपर्यन्तं वर्तते । आधुनिकसंस्कृतकवयः संस्कृतसाहित्यप्रवर्धनने साकम् आनुकालिक्यानां विषयानां प्रतिपादनेपि तत्पराः दृश्यते । संस्कृतकविनां विचारेषु पौराणिक-साङ्कल्पिक-ऐतिहासिक-कथासु अद्यतनकालस्य सामाजिकदुःखानां स्थानं गृहीतम् । वृत्तिराहित्यं, आतंकवादं, राजनीतिः, शासकानां भ्रष्टाचारः, साम्प्रदायिकता, नारीहिंसा, मानविकतायाः अवनतिः, पर्यावरणप्रदूषणं, जातिधर्मचिन्ता इत्यादीनि आधुनिकसंस्कृतसाहित्यस्यविषयत्वेन स्वीकृताः दृश्यन्ते। अस्मिन् काले सामान्यजनाः तथा स्त्रीजनाः च संस्कृतपठनाय ग्रन्थरचनायै च तात्पर्यं प्रकटयन्तीति द्रष्टुं शक्नुमः। कालेऽस्मिन् जाति-धर्म-वर्गभेदं विना संस्कृताध्ययनं सार्वत्रिकमभवत् इति च निर्णेतुं शक्नुमः। कालेऽस्मिन् उपलब्धासु साहित्यकृतिषु भक्तिरसप्रधानाः, स्तुतिरूपाः, चरित्रपरामर्शयुक्ताः, महाव्यक्तिपरिचयप्रधानाः देशाभिमानोज्वलसहिताः रचनाः च दृश्यन्ते। तथैव अनूदितकृतीनाम् आधिक्यमपि कालेऽस्मिन् दृश्यते। भारतीयभाषासु लिखितानां कृतीनां संस्कृतानुवादः कृतः अस्ति तथा च तद्विपरीतम् । वैदेशिकपण्डिताः अपि संस्कृतं पठित्वा संस्कृतकृतीन् तेषां भाषायाम् भाषान्तरीकरणं कुर्वन्तीति द्रष्टुं शक्यते । आधुनिककालस्य साहित्यपरिवर्तनमिव प्रतीयते। चलच्चित्रनिर्माणाय सहायकरूपेण नूतनाः अनेकाः सृष्टयः अपि उपलब्धाः सन्ति। उदाहरणतया पटकथारूपेण, गानरूपेण, ह्रस्वचित्ररूपेण च ।

## साहायग्रन्थसूची


1. केरलीयसंस्कृतसाहित्यचरित्रं-वटक्कुंकूर्
2. केरलसहित्यचरित्रं–उळ्ळूर्
3. भारतीयसंस्कृती, एम्. विजयकुमार्, जि. एल्. प्रिन्डेष्स्, कालटि-2008.
4. 20th Century Sanskrit Poets and Their Contribution, Rashtriya Sanskrit Vidyapeetha, Thirupathi; c2010.
5. Post-Independence Sanskrit Literature: A Critical Survey. (ed). Manibhai K Prajapathy, Dr. A.M. Prajapati Patan; c2005. p. 98-101.
6. Who is Who of Sanskrit Scholars in India 1991 (ed), K.C Dutt, Rashtriya Sanskrit Sansthan and Sahitya Academy; c1994.